# શ્રીષણ્મુખષટ્પદીસ્તવઃ

## Shri Shanmukhashatpadistavah

sanskritdocuments.org

November 10, 2018

# Shri Shanmukhashatpadistavah

# શ્રીષણ્મુખષટ્પદીસ્તવઃ

## Sanskrit Document Information

Text title : ShaNmukhaShaTpadIstavaH

File name : ShaNmukhaShaTpadIstavaH.itx

Category : subrahmanya, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_subrahmanya

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીષણ્મુખષટ્પદીસ્તવઃ

શ્રીમયૂરાચલક્ષેત્રે - (કુન્નક્કુડ્યપરનામકે)
મયૂરાચલાગ્રે સદારં વસન્તં મુદારં દદાનં નતેભ્યો વરાંશ્ચ ।
દધાનં કરામ્ભોજમધ્યે ચ શક્તિં સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૧॥

ગિરીશાસ્યવારાશિપૂર્ણેન્દુબિમ્બં કુરઙ્ગાઙ્કધિક્કારિવક્ત્રારવિન્દમ્ ।
સુરેન્દ્રાત્મજાચિત્તપાથોજભાનું સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૨॥

નતાનાં હિ રાજ્ઞાં ગુણાનાં ચ ષણ્ણાં કૃપાભારતો યો દ્રુતં બોધનાય ।
ષડાસ્યામ્બુજાતાન્યગૃહ્ણાત્પરં તં સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૩॥

પુરા તારકં યો વિજિત્યાજિમધ્યે સુરાન્દુઃખમુક્તાંશ્ચકારાશુ મોદાત્ ।
તમાનન્દકન્દં કૃપાવારિરાશિં સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૪॥

શરાણાં વને જાતમેનં હિ બાલં યતઃ કૃત્તિકાઃ પાયયન્તિ સ્મ દુગ્ધમ્ ।
તતઃ કાર્તિકેયં વદન્તીહ યં તં સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૫॥

હરન્તં ચ બાઢં તમો હાર્દગાઢં ગવાનાધયા ચાતિમોદેન લીઢમ્ ।
સુરેન્દ્રસ્ય પુત્ર્યા ચ ગાઢોપગૂઢં સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૬॥

ઇયં ષટ્પદી યસ્ય વક્ત્રારવિન્દે વિહારં કરોત્યાદરાન્નિત્યમેવ ।
ષડાસ્યઃ કૃપાતઃ સમસ્તાશ્ચ વિદ્યા વિતીર્યાશુ તસ્મૈ સ્વભક્તિં દદાતિ ॥ ૭॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતઃ શ્રીષણ્મુખષટ્પદીસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*